दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-241 | 1 | जून 29 , 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com


**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणः आषाढशुक्लचतुर्थी
आषाढ़ 15 प्रविष्ठांशः मङ्गलमयः भवेत्


2 HP Cabinet Decisions: केवलं हिमाचलीजनाः एव स्तर- ११ वेतनमानपदानां पात्रतां प्राप्नुयुः,

3 येषां उत्तमः परिणामः न तेषां शिक्षकाणां वेतनवृद्धिः स्थगिता भविष्यति, १२०० विद्यालयाः विलीनाः- शिक्षामंत्री

4 विश्वे प्रथमवारं चालकं विना कारयानम् ग्राहकस्य गृहं प्राप्तम्, टेस्लाकम्पन्याः नूतनः कीर्तिमानः


## भारतं विकासं परम्परां च स्वीकृत्य अवश्यं अग्रे गच्छति, राष्ट्रम् औपनिवेशिक-मनोवृत्तिञ्च त्यजेत् - प्रधानमन्त्री नरेन्द्रमोदी



**हिमसंस्कृतवार्ताः** - प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत्, राष्ट्रम् विकासं परम्परां च स्वीकृत्य अवश्यं अग्रे गच्छति। नवदेहल्यां आचार्य-विद्यानन्द-जी-महाराजस्य शतवार्षिकोत्सवस्य उद्घाटनं कुर्वन्, प्रधानमन्त्री अवदत् यत् एतस्य संकल्पस्य आधारेण, सर्वकारः देशस्य सांस्कृतिकस्थलानां तीर्थस्थानानां च विकासं कुर्वन् अस्ति। प्रधानमन्त्री अवदत् यत्, केन्द्रेण प्राकृतभाषायै शास्त्रीयभाषायाः स्थानं प्रदत्तम्। भारतस्य प्राचीन-पाण्डुलिपीनाम् डिजिटलीकरणाय अभियानमपि प्रचलति। सः राष्ट्रम् औपनिवेशिक-चिन्तायाः मुक्तं कर्तुं प्रार्थयत्। प्राप्तवार्तानुसारं कार्यक्रमोऽयं आचार्य विद्यानन्दजी महाराजस्य शततमे जन्मोत्सवावसरे भगवान् महावीर-अहिंसा-भारती-न्यासेन सह सर्वकारेण आयोजितायाः एकवर्षात्मिकायाः राष्ट्रिय-श्रद्धांजल्याः औपचारिकारम्भस्य निदर्शनम् आसीत्।

**सुभाषितम्**

पुस्तकस्था तु या विद्या,
परहस्तगतं धनम्।
कार्यकाले समुत्पन्ने,
न सा विद्या न तद्धनम्॥

अर्थात्- पुस्तक में स्थित विद्या और किसी को दिया हुआ हमारा धन हमें आवश्यकता के समय हमारे पास न होने से काम नहीं आता।


प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest h|msanskr|tvartah Da|ly Sanskr|t Newspaper every day, wr|te Hello on 7876636263 Watsapp


### संविधानस्य प्रस्तावना एव तस्य आत्मा भवति, सा परिवर्तनशीला न भवति- उपराष्ट्रपतिः जगदीपधनखड़ः



हिमसंस्कृतवार्ता - उपराष्ट्रपतिः जगदीपधनखड़ः उक्तवान् यत् संविधानस्य प्रस्तावना एव तस्य आत्मा भवति, सा परिवर्तनशीला न भवति । नवदेहल्यां पुस्तकविमोचनकार्यक्रमं सम्बोधयन् श्रीधनखड़ः अवदत् यत् आपत्काले जनाः प्रायः दासत्वं प्राप्नुवन्ति स्म तस्मिन् समये प्रस्तावनापि परिवर्तितेति।

### किशनगङ्गा-रत्ले जलविद्युत्-परियोजनायाः विषये तथाकथित-मध्यस्थ-न्यायालयेन प्रदत्तः निर्णयः भारतदेशः निराकृतवान्



हिमसंस्कृतवार्ता - भारतकेन्द्रशासितप्रदेशे जम्मू-कश्मीर्-प्रदेशे स्थितायाः किशनगङ्गा-रत्ले जलविद्युत्-परियोजनायाः विषये तथाकथित-मध्यस्थ-न्यायालयेन प्रदत्तः निर्णयः भारतदेशः निराकृतवान्। एकस्मिन् वक्तव्ये, विदेशमन्त्रालयः अवदत् यत्, भारतम् अस्य मध्यस्थता-न्यायालयस्य विधिमान्यतां कदापि न अङ्गीकृतवती, तस्य संविधानम् सिन्धु-जल-सन्धेः गाम्भीरम् उल्लङ्घनं इति अमन्यत्। अवधेयमस्ति यत् पहलगाम्-आततायिनः आक्रमणानन्तरं देशेन सिन्धु-जल-सन्धिः स्थगितास्ति।

## महानदी-कोल्फील्ड्-लिमिटेड् इति संस्थया ओडिशा-राज्ये पञ्चत्रिंशत्मिलीयन टन इति क्षमतायुक्तौ नूतनौ कृष्णाङ्गारागारौ उद्घाटयिष्येते



**हिमसंस्कृतवार्ताः** - कोल्-इण्डिया इत्यस्य सहायकसंस्था महानदी-कोल्फील्ड्-लिमिटेड् इत्येषा संस्था ओडिशा-राज्ये पञ्चत्रिंशत्-मिलीयन- टन् इति संयुक्तक्षमतायुक्तयोः नूतनयोः अङ्गारागारयोः उद्घाटनार्थं सज्जिता अस्ति। सुभद्रा-आगारः, बलभद्र-आगारश्च, राज्यस्य अङ्गुल्-मण्डलस्य ताल्चेर्-अङ्गारक्षेत्रेषु स्थापिताः भविष्यन्ति। एम्. सि. एल्. इत्यस्य मतेन सुभद्रा-आगारे अस्य वित्तीयसत्रस्य अन्तपर्यन्तं प्रतिवर्षं पञ्चविंशतिमिलीयन टन् इति कृष्णाङ्गारस्य उत्पादनं भविष्यति इति निर्धारितमस्ति ।

## अमेरिका-देशः कनाडा-देशेन सह व्यापारसंवादम् निरस्तं कृत्वा नूतनमूल्यानि च शीघ्रमेव घोषयिष्यति



हिमसंस्कृतवार्ताः - अमेरिकीयराष्ट्रपतिः डोनाल्ड ट्रम्पः कनाडादेशेन सह व्यापारवार्तालापस्य समाप्तेः घोषणाम् अकरोत्, तस्य कनाडादेशेन सह नूतनशुल्कपरिमापः शीघ्रमेव घोषयिष्यते इति उक्तवान्। प्राप्तवार्तानुसारं सोमवासरतः एषः करः प्रभावी भविष्यति।


**सूचना-** हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति



कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११


### अन्ताराष्ट्रिय-परमाणु ऊर्जा-संस्था इत्यनेन उक्तं यत् द्वादश-दिवसानां इस्राइल्-ईरान्-युद्धानन्तरं गल्फ्-क्षेत्रे विकिरणस्य स्तरः सामान्यः एव अस्ति

हिमसंस्कृतवार्ताः - अन्ताराष्ट्रिय-परमाणु ऊर्जा-संस्थायाः महानिदेशकः राफेल् मारियानो ग्रोसी इत्येषः अवदत् यत् इस्राइल्-ईरान्-देशयोः मध्ये द्वादश-दिवसानां द्वन्द्वानन्तरं गल्फ्-क्षेत्रे विकिरणस्य स्तरः सामान्यः एव अस्ति, परम् ईरान्-देशस्य अनेकेषां परमाणु-स्थलानां महती क्षतिः अभवत्। श्रीग्रोसी इत्ययं अन्ताराष्ट्रिय-विकिरण-निरीक्षण-व्यवस्थायाः माध्यमेन नियमितरूपेण आई. ए. ई. ए. इत्यस्मै प्रतिवेदयन् क्षेत्रीय-दत्तांशम् उद्धृत्य उक्तवान् यत् एतत् अष्टचत्वारिंशद्राष्ट्र-समूहः कथमपि परमाणु ऊर्जा-रियेक्टर् इत्यतः महत्त्वपूर्णं रेडियो-आक्टिव् इत्यस्य निर्गमनं ज्ञातुं शक्नोति।

# HP Cabinet Decisions: केवलं हिमाचलीजनाः एव स्तर- ११ वेतनमानपदानां पात्रतां प्राप्नुयुः, बहूद्देश्यकार्यकार्यकर्तॄणां मानदं वर्धितम्

**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशस्य मन्त्रिमण्डलस्य गोष्ठी शनिवासरे शिमलानगरे मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खोः अध्यक्षतायां सम्पन्ना। सभायां बहवः प्रमुखाः निर्णयाः कृताः। राज्यमन्त्रिमण्डलेन स्तर-११ वेतनमानपदानां समूह ख- तः समूह- गपर्यन्तं पुनर्वर्गीकरणस्य अनुमोदनं कृतम् अस्य निर्णयस्य अन्तर्गतं अधुना केवलं वास्तविकाः (स्थायि/मूल) हिमाचलीजनाः एव समूह ग पदानाम् आवेदनं कर्तुं योग्याः भविष्यन्ति। पूर्वं समूह ख श्रेणी अन्तर्गतानाम् एतेषां पदानां नियुक्तिः हिमाचलप्रदेश- लोकसेवा- आयोगस्य माध्यमेन भवति स्म, एतेषु पदेषु देशस्य सर्वेभ्यः अभ्यर्थिनः आवेदनं कर्तुं शक्नुवन्ति स्म। अधुना तेषां नियुक्तिप्रक्रिया हिमाचलप्रदेश- राज्यचयनायोगस्य माध्यमेन समूह- ग- इत्यस्य नियमानुसारं भविष्यति। समागमे ५०० पशुमित्राणां नियुक्तिरपि अनुमोदिता।

## बहूद्देश्यकार्यकर्तॄणां मानदं वर्धितम्, कृषकाणां कृते नवीना योजना

राज्यमन्त्रिमण्डलेन लोकनिर्माणविभागस्य प्रायः ५,००० बहूद्देश्यकार्यकर्तॄणां मासिकं मानदं ५,००० रुप्यकात् ५,५०० रुप्यकाणि यावत् वर्धयितुम् अनुमोदनं कृतम्। अराजकीय- दुग्धसहकारीसभाभ्यः दुग्धस्य आपूर्तिं कुर्वतां कृषकाणां कृते दुग्धप्रोत्साहनयोजनाम् आरभ्यत इति मन्त्रिमण्डलेन निर्णयः कृतः। अस्य अन्तर्गतं दुग्धनिर्मातृभ्यः प्रत्यक्षलाभहस्तांतरणस्य (DBT) माध्यमेन प्रतिसेटकं त्रिरुप्यकाणां अनुदानं दीयते।



## पर्यटनविकासनिगमस्य कार्यालयः धर्मशालां स्थानांतरितः, जिला पुलिस देहरायां 101 पदेषु नियुक्तिः

मन्त्रिमण्डलेन हिमाचलप्रदेश- पर्यटनविकासनिगमस्य मुख्यालयस्य शिमलातः धर्मशालानगरं स्थानान्तरणाय सभायाम् अनुमोदनं कृतम्। काङ्ग्ड़ा हिमाचलप्रदेशस्य पर्यटनराजधानी इति घोषणां दृष्ट्वा एषः निर्णयः कृतः अस्ति। एषः निर्णयः शिमलानगरे जनसमूहस्य प्रभावं न्यूनीकर्तुं साहाय्यं करिष्यति। सभायां जिलापुलिस, देहरायाः पुलिसपंक्तौ विभिन्नश्रेणीनां 101 पदानां निर्माणाय, पूरणाय च अनुमोदन कृतम्।

## सौर-ऊर्जा-परियोजनानां स्थापनायै व्याजसहायतायाः प्रावधानम्

राज्यसर्वकारेण स्वरोजगारं प्रोत्साहयितुं पारम्परिक ऊर्जास्रोतसु निर्भरतां न्यूनीकर्तुं च उद्देश्यं कृत्वा सौर ऊर्जापरियोजनानां स्थापनायै व्याजसहायताप्रदानस्य अनुमोदनं कृतम् अस्ति। अस्मिन् निर्णये जनजातीयक्षेत्रेषु १०० किलोवाटतः १ मेगावाटपर्यन्तं परियोजनासु पञ्चप्रतिशतव्याजसहायता प्रदत्ता भविष्यति, जनजातीयरहिक्षेत्रेषु २५० किलोवाटतः २ मेगावाटपर्यन्तं परियोजनासु ४ प्रतिशतं व्याजसहायता प्रदत्ता भविष्यति।


## 100 पंचायतेषु 500 किलोवाट सौरविद्युत्संस्थानानि स्थापितानि भविष्यन्ति

राज्यमन्त्रिमण्डलेन हिम-ऊर्जायाः चयनितग्रामपञ्चायतानां च मध्ये १०० पंचायतेषु ५०० किलोवाटक्षमतायाः सौरविद्युत्संस्थानानां स्थापनायाः ज्ञापनपत्रे हस्ताक्षरस्य अनुमोदनं कृतम्। प्रत्येकं परियोजनायाः मासिकं प्रायः २५ लक्षरूप्यकाणाम् आयः भविष्यति इति अपेक्षा अस्ति। अस्य आयस्य ३० प्रतिशतं हिम- ऊर्जायै, २० प्रतिशतं राज्यसर्वकाराय, ४० प्रतिशतं च सम्बन्धितग्रामपञ्चायतानां कृते गमिष्यति। अनाथ- विधवा- कल्याणाय पंचायतानां कृते अतिरिक्तं 10 प्रतिशतं आयं प्रदत्तं भविष्यति।

## पंचायत-आपत्कालीन- प्रतिक्रिया केन्द्राणां भविष्यति स्थापना

मन्त्रिमण्डलेन विभिन्नपंचायतेषु आपदां दृष्ट्वा पंचायत- आपत्कालीनप्रतिक्रिया केन्द्राणां स्थापनायाः निर्णयः कृतः। मन्त्रिमण्डलस्य मन्त्री जगतसिंहनेगी, यादविन्द्रगोमा च मन्त्रिमण्डलस्य निर्णयानां विषये सूचनां दत्तवन्तौ।

# डॉ. राजेश शर्मा हिमाचलप्रदेश- विद्यालयीय- शिक्षामण्डलस्य अध्यक्षः, अधिसूचना निर्गता



**हिमसंस्कृतवार्ताः - शिमला।** हिमाचलसर्वकारेण डॉ. राजेशशर्मा इत्ययं हिमाचलप्रदेश- विद्यालयीय- शिक्षामण्डस्य धर्मशालायाः अध्यक्षत्वेन नियुक्तः। अस्मिन् विषये शनिवासरे विद्यालयीयशिक्षाविभागेन अधिसूचना कृता। ज्ञातव्यं यत् विद्यालयीय- शिक्षामण्डले धर्मशालायाम् अध्यक्षपदं बहुकालात् रिक्तम् आसीत्। यस्मिन् नियुक्तिः सर्वकारेण कर्तव्या आसीत्। सम्प्रति उपायुक्तः काङ्ग्ड़ा अध्यक्षपदस्य दायित्वं निर्वहति स्म। अधुना शिक्षामण्डलधर्मशालायाम् अध्यक्षस्य स्थायीनियुक्त्यर्थं सर्वकारेण अधिसूचना कृता अस्ति। यत्र कांगड़ातः डॉ. राजेशशर्मा अध्यक्षत्वेन नियुक्तः अस्ति। डॉ. राजेशस्य नियुक्तेः नियमाः उपनियमाः च पृथक् पृथक् निर्गताः भविष्यन्ति।

# केन्द्रीयमन्त्री किरणरिजिजुः काजायां क्रीडाप्रशिक्षणकेन्द्रस्य, आइसहॉकी- क्रीडाङ्गणस्य च आधारशिला अस्थापयत्



**हिमसंस्कृतवार्ताः - काजा।** केन्द्रीयसंसदीयकार्याणां अल्पसंख्यककार्याणां च मन्त्री किरण- रिजिजुः शनिवासरे काजा, लाहौल- स्पीतिः इत्यत्र प्रधानमन्त्रिजनविकासकार्यक्रमस्य अन्तर्गतं प्रायः ७४ कोटिरूप्यकाणां व्ययेन काजाक्रिकेटप्राङ्गणे प्रस्तावितस्य उच्चोच्चताक्रीडाप्रशिक्षणकेन्द्रस्य, आइसहॉकीरिङ्कस्य, मंडपस्य, क्रीडाप्रशिक्षणकेन्द्रस्य च शिलान्यासं कृतवान्। अस्मिन्नवसरे सांसद कंगना रानौत, विधायकः अनुराधा राणा, पूर्व विधायकः रविठाकुरः आदयः सम्मानिताः गणमान्याः जनाः उपस्थिता अभवन्। रिजिजुः सोशल मीडियायां प्रकाशिते उल्लेखे लिखितवान् - प्रधानमन्त्री नरेन्द्रमोदी इत्यस्य विकसितभारतस्य दृष्टिकोणस्य अनुरूपं एतासां परियोजनानां उद्देश्यं युनां सशक्तिकरणं, आइसहॉकी इत्यादीनां शीतकालीनक्रीडाणां प्रचारः, स्थानीयजीविकायाः सृजनं, काजाक्षेत्रं प्रमुखक्रीडापर्यटनकेन्द्ररूपेण स्थापनं च अस्ति। अस्मिन् काले मन्त्री सांसदकङ्गना रानौत इत्यनया सह स्पीति-लोकनृत्यम् अपि कृत्वा तस्य विडियो स्वस्य आभासीय-पृष्ठे स्थापितवान्।

# काङ्ग्रेससङ्घटनस्य घोषणायाः प्रतीक्षा- प्रतिभासिंहः



**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशकाङ्ग्रेसस्य अध्यक्षा प्रतिभासिंह इत्यनया उक्तं यत्, स्वर्गीयवीरभद्रसिंहस्य प्रतिमायाः अनावरणं जूनमासस्य २३ दिनाङ्के ऐतिहासिके रिजप्राङ्गणे करणीयम् आसीत्, परन्तु अनावरणकार्यक्रमः सोनियागान्धी, राहुलगान्धी, प्रियङ्कागान्धी, मल्लिकार्जुनखड़गे इत्येतेषाम् आज्ञानुसारं स्थगितम्। प्रतिभासिंह अवदत् यत् सोनिया गान्धी स्वयमेव अस्मिन् कार्यक्रमे आगन्तुम् इच्छति स्म, परन्तु तस्याः व्यस्ततायाः कारणात् जूनमासस्य २३ दिनाङ्के आगन्तुं सम्भवं नासीत्। अधुना वीरभद्रसिंहस्य प्रतिमायाः अनावरणकार्यक्रमः एतेषां केन्द्रीयनेतृत्वस्य आज्ञानुसारं जुलाई मासस्य १५ दिनाङ्के स्थापितः अस्ति, अस्मिन् दिने काङ्ग्रेसस्य एते बृहत् नेतारः अत्र आगमिष्यन्ति। सा अवदत् यत् स्वर्गीयः वीरभद्रसिंहः षड्वारं हिमाचलप्रदेशस्य मुख्यमन्त्री अभवत्, सर्वे नेतारः तस्य सम्मानं कुर्वन्ति। एतादृश्यां परिस्थितौ गान्धीपरिवारः एव अस्मिन् कार्यक्रमे सम्मिलितः भवितुम् इच्छति, एते नेतारः शिमलानगरम् आगमिष्यन्ति। शिमलानगरे एकस्य कार्यक्रमस्य समये मीडियाभिः सह अनौपचारिकरूपेण वार्तालापं कुर्वन्ती प्रतिभासिंह अवदत् यत् यदि वीरभद्रसिंहस्य प्रतिमायाः अनावरणकार्यक्रमे राष्ट्रियनेतारः भागं गृह्णन्ति तर्हि सम्पूर्णे भारते एतत् सन्देशं प्रेषयिष्यते यत् काङ्ग्रेसदलं योगदानं कुर्वतां स्मरणं करोति। वीरभद्रसिंहस्य काङ्ग्रेस- हिमाचलयोः योगदानं सर्वे स्मर्यन्ते। केन्द्रसर्वकारे स्थित्वा अपि तेन महत् कार्यम् कृतम्। भवद्भ्यः कथयामः यत् शिमला- रिजस्थले स्थापितायाः पूर्व-मुख्यमन्त्रिणः वीरभद्रसिंहस्य प्रतिमायाः अनावरणं १५ जुलाई दिनांके भविष्यति। यत्र पक्षविपक्षयोः नेतारः आहुताः सन्ति। काङ्ग्रेस- अध्यक्षपदस्य विषये सीएम सुखविन्दरसिंहस्य वक्तव्यसम्बद्धे प्रश्ने प्रतिभासिंह अवदत् यत् शीर्षनेतृत्वं यत्किमपि उत्तरदायित्वं ददाति, तत् शरीरेण, मनसा, धनेन च पूर्णं कर्तुं प्रयतते। संस्थां अग्रे नेतुम् कार्यं भविष्यति इति सा अवदत्। सा काङ्ग्रेसपक्षे स्वस्य पूर्णं योगदानं दत्तवती अस्ति तथा च सा संस्थायाः सुदृढीकरणाय कार्यं करिष्यति। काङ्ग्रेससङ्घटनस्य निर्माणे विलम्बेन सम्बद्धे प्रश्ने प्रतिभासिंहः अवदत् यत् सङ्घटनस्य निर्णयः शीर्षनेतृत्वस्य कार्यम् अस्ति। वयं बहुवारं शीर्षनेतृत्वं शीघ्रमेव संस्थां निर्मातुं अनुरोधं कृतवन्तः।

# Kangra News - टीएमसी इत्यत्र स्वेच्छया रक्तदातृ-समाजसेवीसंस्थाः सम्मानिताः



**हिमसंस्कृतवार्ताः - काङ्गड़ा।** डॉ.राजेन्द्रप्रसाद- राजकीयचिकित्सा- महाविद्यालयस्य एवं चिकित्सालयस्य टाण्डा इत्यस्या इम्यूनोहेमेटोलॉजी एण्ड रक्त- ट्रांसफ्यूजनविभागेन (रक्तकेन्द्रम्) डॉ. मिलाप शर्मा (प्राचार्यः) तथा डॉ. अंजलि चव्हाण (विभागाध्यक्षा) इत्यनयोः सक्षमनेतृत्वे महाविद्यालयस्य पुस्तकालये विश्वरक्तदातादिवस- 2025 इत्यस्य सफलम् आयोजनं विहितम्। अस्मिन् अवसरे बहवः गणमान्यजनाः उपस्थिताः आसन्। यथा...डॉ. अवनिन्दरशर्मा (अतिरिक्तनिदेशकः), डॉ. विवेकबन्यालः (चिकित्साधीक्षकः), डॉ. अरविंदः राणा (उपचिकित्साधीक्षक), डॉ. रश्मिकौल (विभागप्रमुखा, विकृतिविज्ञानम्), डॉ. मनीषः शर्मा एवं डॉ. गरिमा शाह (चिकित्सा-अधिकारी, रक्तबैंक), श्रीमती सुमनबोध (प्राचार्य, नर्सिंगमहाविद्यालयः), श्री राजीवसमकारिया (अध्यक्षः, एनजीओ टाण्डा) एवं श्री रमेशपंजवालः (महासचिवः, एनजीओ टांडा)। जनवरी २०२४ तः अप्रैल २०२५ पर्यन्तं १०० तः अधिकान् स्वैच्छिकरक्तदातृणां व्यवस्थां कृतवन्तः रक्तदातृसंस्थाः तेषां निस्वार्थयोगदानस्य कृते सम्मानिताः। एताः

**संस्थाः यथा -**

- **श्री सत्यसाईं- सेवासमितिः**
- **संतनिरंकारीमिशनः**
- **नागरोटा सेवियर्स**
- **नूरपुर डोनर क्लब**
- **कांगड़ा सेवियर्स**
- **हिमालयन सेवियर्स**
- **कांग्रेस कमेटी, नादौन**
- **शहीद भुवनेश डोगरा युवा क्लब, देहरा**
- **हिमाचल ब्लड टाइगर्स**
- **समर्पण संस्था**
- **राजीव गांधी राजकीय अभियांत्रिकी महाविद्यालय, नगरोटा बागवां**
- **14 बटालियन एनडीआरएफ, जस्सूर**
- **बाल मेला समिति, नागरोटा बगवां**
- **द्रोणाचार्य पी.जी. कॉलेज, रैत**
- **एबीवीपी, धर्मशाला कॉलेज**
- **एबॉट हेल्थकेयर प्राइवेट लिमिटेड**

**इत्यादयः सन्ति।**

तदतिरिक्तं परविन्दरमहोदयं राजकुमारमहोदयं च प्रत्येकं शताधिकवारं रक्तदानं कृतवन्तौ, तेभ्यः शताब्दीरक्तदातृत्वेन विशेषमान्यता दत्ता। पवनगुप्तामहोदयः (काङ्गड़ा सेवियर्स) , वरुणमहोदयः (नाग्रोटा उद्धारकः) विशालमहोदयः (हेल्पिंग हैंड्स) च शीघ्रतायाः निस्वार्थसहकार्यस्य च विशेषतया प्रशंसाम् अकरोत्।

# येषां उत्तमः परिणामः न तेषां शिक्षकाणां वेतनवृद्धिः स्थगिता भविष्यति, १२०० विद्यालयाः विलीनाः- शिक्षामंत्री



**हिमसंस्कृतवार्ताः - शिमला।** शिक्षामन्त्री रोहितठाकुरः उक्तवान् यत् हिमाचलम् शिक्षाक्षेत्रे अतीतस्य वैभवं प्राप्तवान् इति सम्पूर्णस्य राज्यस्य कृते सुखस्य विषयः अस्ति। शुक्रवासरे राज्यसचिवालये पत्रकारैः सह वार्तालापं कुर्वन् शिक्षामन्त्री अवदत् यत् १९४७ तमे वर्षे हिमाचलस्य साक्षरतादरं सप्तप्रतिशतं, २०११ तमे वर्षे साक्षरतादरं ८३ प्रतिशतं, सम्प्रति शतप्रतिशतं प्राप्स्यति। सः अवदत् यत् २०२१ तमे वर्षे राष्ट्रियमूल्यांकनसर्वेक्षणे वयं २१ तमे स्थाने आस्म, अधुना अस्मिन् वर्षे कृते सर्वेक्षणे हिमाचलं ५ स्थानं प्राप्तवान् अस्ति। ASER इत्यस्य सर्वेक्षणे हिमाचलं शिक्षणे पठने च केरलं त्यक्तवान् अस्ति। रोहितः अवदत् - 'पूर्वसर्वकारकाले आर्थिकस्थित्या सह शिक्षायाः स्थितिः अतीव दुर्गता आसीत् । अहं शिक्षाविदः नास्मि किन्तु कठिनकार्यस्वामी अस्मि, अस्माकं सर्वकारेण कठिननिर्णयाः कृताः। इदानीं वयं अधिकं परिष्कारं करिष्यामः, शिक्षकानां रिक्तपदानि पूर्यन्ते, एकशिक्षकविद्यालयानाम् संख्या अतीव न्यूना अभवत्।'

## प्रायः १२०० विद्यालयाः विलीनाः अभवन्



शिक्षामन्त्री उक्तवान् यत् ये शिक्षकाः उत्तमं परिणामं न ददति तेषां वृद्धिः स्थगिता भविष्यति, ये शिक्षकाः उत्तमं परिणामं ददति तेषां सम्मानं भविष्यति। मानसूनकाले विद्यालयेषु सर्वेषां सुरक्षा सुनिश्चिता भविष्यति। भाजपाशासनकाले पञ्चवर्षेषु केवलं ५११ व्याख्यातारः एव नियुक्ताः, अस्माकं सर्वकारस्य कार्यकाले अद्यावधि ७०० तः अधिकानि व्याख्यातापदानि पूरितानि सन्ति। चत्वारि सहस्राणि पदानि बैच-वार-रूपेण पूरितानि आसन्। आगामिसमये सप्तसहस्राधिकपदानां पूरणस्य प्रक्रिया प्रचलति। विद्यालयेषु बालिकाछात्राणां यौनशोषणस्य घटनाः दुःखदाः सन्ति। एतेषु प्रकरणेषु एतावता द्वौ शिक्षकौ निलम्बितौ।

# पटनानगरे "आम्रमहोत्सवः २०२५" इत्यस्य भव्यः शुभारम्भः




**हिमसंस्कृतवार्ताः, पटना, अंकुशः।**पटनानगरे ज्ञानभवने आयोज्यमानस्य "आममहोत्सवस्य २०२५" इत्यस्य शुभारम्भः मान्यः उपमुख्यमंत्री कृषिमन्त्री श्री विजयकुमारसिन्हः इत्यनेन कृतः। उद्घाटनसमये सः समुपस्थितान् कृषकान्, उद्यानविद्यानिष्णातान्, व्यापारीन्, वैज्ञानिकांश्च अभिनन्द्य आह —"एषः महोत्सवः केवलं फलोत्पादकत्वस्य उत्सवः न, अपि तु अस्माकं कृषि-परम्परायाः समृद्धेः प्रतीकः अपि अस्ति। विशेषतः आम्रफलस्य क्षेत्रे बिहारस्य उत्कर्षः अधुना राष्ट्रस्तरे ख्यातिप्राप्तः अस्ति।" तेन उक्तं यत् — राज्यस्य सर्वेषु जनपदेषु स्थितैः कृषकैः मिलित्वा ८०० कृषकाः महोत्सवे भागं गृहीतवन्तः। ते स्वउत्पादितानि ५००० आम्रफलानि प्रदर्शितवन्तः। आम्रविक्रयाय च सुव्यवस्था महोत्सवे स्थापिता।तेन सूचितं यत् — बिहारे आम्रफलस्य उत्पादनं सुमारे १.६५ लक्ष-हेक्टेयर क्षेत्रे क्रियते, यतः १५.८ लक्ष-मेट्रिक्-टन फलोत्पादनं सम्भवम् अभवत्। २००७-०८ तमे वर्षे लागू कृतस्य कृषिरोडम्याप्-नामकस्य योजनायाः प्रभावेन, एतस्मिन्समये उत्पादनवृद्धिः ८२ प्रतिशतम् प्राप्ता अस्ति।राज्ये "आम्रविकासयोजना" इत्यस्य अन्तर्गतं गुणवत्तायुक्तं उत्पादनं कृते विविधकार्याणि निरन्तरं क्रियन्ते। कृषि विश्वविद्यालयैः, कृषि विज्ञान केन्द्रैः, तथा वैशाल्यां स्थितेन "सेंटर फॉर एक्सीलेंस फॉर मैंगो" इत्यनेन संस्थेन कृषकानां प्रशिक्षणं दीयते।तेन अपि स्मारितं यत् — २०१८ तमे वर्षे भागलपुरे उत्पाद्यमानस्य "जर्दालु आम्रस्य" GI टैग प्रदत्तम्। उपमुख्यमंत्रिणा स्पष्टीकृतं यत् "राज्यं केवलं उत्पादनवृद्धिं न पश्यति, अपितु आम्रफलस्य दुरवस्थितेषु अपि विपणनं, निर्यातं च सुनिश्चितं कर्तुम् आकाङ्क्षति।"उद्याननिदेशालयेन प्रतिवर्षं "आम्रमहोत्सवः" आयोज्यते, यत्र आम्रफलोत्पादकाः, व्यापारीणः, प्रसंस्करणकर्तारः, वैज्ञानिकाः, निर्यातकाः च एकत्र संगच्छन्ति।वर्षे २०२४-२५ मध्ये २२४५.०७ मेट्रिक् टन आम्रफलं तथा आमपल्प निर्यातं कृतम्। एपिडा (APEDA) नाम्ना संस्थया संयुक्त-अरब-अमीरात् तथा सौदीअरबदेशयोः क्रेता-विक्रेता-सम्मेलनम् आयोज्यते, यत्र बिहारे उत्पादितं आम्रफलं प्रचारार्थं प्रेष्यते। तेन उक्तं यत् —"अस्माकं ध्येयम् अस्ति — उत्पादनवृद्धेः सह कृषकाणां कृते उचितं मूल्यं च सुलभं भवेत्। एषः महोत्सवः अनुभवविनिमयाय, नवप्रवर्तनाय, विज्ञान-समन्वयाय च एकं प्रभावशालीं पृष्ठभूमिं सृजति।" अस्मिन् महोत्सवे भारतीयः संस्थानः ऑफ हॉर्टिकल्चर रिसर्च - बंगलोर, च सेंट्रल इंस्टीट्यूट ऑफ सबट्रॉपिकल हॉर्टिकल्चर - लखनऊ इत्येतयोः प्रतिष्ठानयोः वैज्ञानिकाः अपि उपस्थिताः आसन्। बिहार कृषिविश्वविद्यालय - सबौर, च डॉ. राजेन्द्रप्रसाद केंद्रीय कृषि विश्वविद्यालय - समस्तीपुर इत्येतयोः विशेषज्ञैः आमवृक्षाणां नवसंवर्धनाय, जीर्णोद्धाराय च नवीनं तकनीकी-ज्ञानं कृषकेभ्यः प्रदत्तं भविष्यति। प्रधानसचिवस्य वक्तव्यं- प्रधान सचिवः श्री पंकजकुमारः अपि कृषकान् अभिनन्दयन् अवोचत् —"आम्रस्य परम्परां रक्षेयुः, संवर्धयेम च — एषा अस्माकं प्रथमा उत्तरदायित्वनिष्ठा अस्ति। एषः महोत्सवः कृषकानां कृते ज्ञानवृद्धेः, विपणनस्य अवसरस्य च नवद्वाराणि उद्घाटयति।"
तेन आग्रहः कृतः यत् —"प्रत्येकवर्षे नूतनविषयपर आधारितः महोत्सवः आयोजनीयः, यः केवलं एकदिवसीयः न स्यात्, अपितु सम्पूर्णवर्षे कृषि-चिन्तनस्य प्रेरणास्रोतः भवेत्। आमव्यवसायः नवप्रवर्तनैः, वैज्ञानिकदृष्ट्या, उद्यमितायाः सहयोगेन च संवर्धनीयः

# "पाण्डुलिपिविज्ञानं प्रतिलेखनञ्च" राष्ट्रियकार्यशालायाः

## षष्ठदिवसः भव्यरूपेण सम्पन्नः





हिमसंस्कृतवार्ताः- डॉ. निशिकान्तपाण्डेयः नलबारी असमप्रदेशः। कुमारभास्करवर्म- संस्कृत-पुरातनाध्ययन- विश्वविद्यालये केन्द्रीयसंस्कृतविश्वविद्यालयस्य सहयोगेन आयोज्यमाना "पाण्डुलिपिविज्ञानं प्रतिलेखनञ्च" विषयका एकविंशतिदिनात्मक- राष्ट्रियकार्यशाला शनिवासरे षष्ठदिने प्रविश्य अतीव भव्यरूपेण सम्पन्ना। दिनस्य शुभारम्भः विश्वविद्यालयस्य शोधछात्रेण लिराज काफ्लेमहोदयेन मन्त्रोच्चारणेन सह कृतः। कार्यक्रमस्य सञ्चालकत्वं विश्वविद्यालयस्य परीक्षानियन्त्रकः एवं सर्वदर्शनविभागाध्यक्षः डॉ. रणजीतकुमारतिवारी-महोदयेन कुशलतापूर्वकं निर्वाहितम्। कार्ये डॉ. सुधाकर मिश्रमहोदयः (व्याकरणविभागः), डॉ. छबिलाल उपाध्यायः (साहित्यविभागः), तथा डॉ. मैत्रेयी गोस्वामिमहोदया (धर्मशास्त्रविभागः) प्रमुखरूपेण सहभागीभूताः।दिनस्य मुख्यवक्तारः आसन्- गुवाहाटी विश्वविद्यालयस्य संस्कृतविभागस्य आचार्यः प्रो. कामेश्वरशुक्लमहोदयः। तेन दिवसस्य चतुर्षु सत्रेषु पाण्डुलिपिशिक्षणम् अतीव सजीवम् आचरितम्। तेन न केवलं लिपिलेखनस्य विविधपद्धतिः, सूक्ष्मतायुक्त वर्णनिर्माणं च पाठितम्, अपि तु प्रतिभागिनां हस्ते लेखनाभ्यासः अपि कारितः। तत्र 'कविनन्दिनी' इति पाण्डुलिपेः अनुलेखनमपि सुष्ठुतया सुसम्पन्नम्। प्रो. शुक्लमहोदयेन प्रतिपादितं यत्- "पाण्डुलिपिशास्त्रं न केवलम् अतीतानां ज्ञानेन वर्तमानं समृद्धयति, अपि तु भविष्यस्य अध्ययनाय मूलाधारं स्थापयति।" इत्यनेन षष्ठदिवसस्य पाठ्यक्रमः 'पाण्डुलिपेः अनुलेखनं' इत्यनेन प्रमुखाकर्षणं प्राप्तम्। प्रतिभागिनः अतीव उत्साहेन शिक्षायाः लाभं प्राप्नुवन्ति स्म।

# विश्वे प्रथमवारं चालकं विना कारयानम् ग्राहकस्य गृहं प्राप्तम्, टेस्लाकम्पन्याः नूतनः कीर्तिमानः



हिमसंस्कृतवार्ताः। विश्वे प्रथमवारं कश्चन कारयानं निर्माणसंस्थानतः ग्राहकस्य गृहं यावत् मानवस्य हस्तक्षेपं विना (न चालकः न दूरस्थसञ्चालकः) गत्वा इतिहासं निर्मितवान्। एतत् पराक्रमं टेस्ला-संस्थायाः नूतनेन पूर्णतया स्वायत्तकारेन मॉडल् वाई इत्यनेन प्राप्तम्, यत् कम्पन्याः मुख्याधिकारी विश्वस्य लोकप्रियतमः उद्यमी च एलोन् मस्कः स्वयमेव स्वस्य जन्मदिनस्य अवसरे वितरितवान्। टेस्ला इत्यनेन अस्याः उपलब्धेः विडियोचलचित्रं स्वस्य सामाजिकमाध्यममञ्चे X इत्यत्र सार्वजनिकः कृतः, यस्मिन् यातायातसंकेतानां, पदयात्रिकाणां, अन्येषां वाहनानां च मध्ये आत्मविश्वासेन भ्रमणं कुर्वन् दृश्यते कम्पन्याः अनुसारं एतत् वितरणं अमेरिकादेशस्य टेक्सास्-नगरे कृतम्, यत्र मॉडल् वाई-इत्यनेन कुलशीर्षवेगः ७२ माइल (प्रायः ११६ किलोमीटर् प्रतिघण्टा) इति अभिलेखः कृतः टेस्ला-संस्थायाः ए.आइ.-स्वायत्त-प्रणाली-प्रमुखः अशोक-एलुस्वामी-महोदयः अवदत् यत् एतत् प्रदर्शनं वा परीक्षणं वा न, अपितु वास्तविक-जगतः परिस्थितौ कृतं परिचालन-वितरण-मिशनं, यत्र कोऽपि सुरक्षाचालकः नास्ति वयं भवद्भ्यः वदामः यत् Tesla Model Y इति प्रथमवारं मार्च २०१९ तमे वर्षे प्रारम्भः अभवत् ।अस्य नूतनं संस्करणं Fully Autonomous Driving (FSD) इति सुविधायाः सह अद्यतनं कृतम् अस्ति । अस्य विद्युत्-एसयूवी-इत्यस्य आरम्भमूल्यं ४०,००० डॉलर (प्रायः ३४ लक्षरूप्यकाणि) तः आरभ्यते ।